# bhAratAShTakam

# ભારતાષ્ટકમ્

## Document Information

Text title : Bharatashtakam

File name : bhAratAShTakam.itx

Category : misc, sanskritgeet, aShTaka

Location : doc_z_misc_general

Author : chandraguptabhAratIyaH

Acknowledge-Permission: Chandragupta Bharatiya

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

# ભારતાષ્ટકમ્

હૃદયે ભક્તિર્દેહે શક્તિર્મમ મુખે લસતિ ભારતગીતમ્ ।
જય હે! જય હે! જય જય જય હે! ગાયામિ સદા ભારતગીતમ્ ॥ ૧॥

સુન્દર-સુ-સુશોભિતરાષ્ટ્રમસિ, ત્વં ભાસિ રતા ત્વં ભરતભૃતા ।
શુભકર્મકૃતે કલ્યાણમસિ,  દણ્ડોઽસિ ખરો દુષ્કર્મકૃતે ॥ ૨॥

ન્યાયશ્ચ તથા દણ્ડશ્ચ તથા, ત્વં કર્મશુભં ધર્મશ્ચ તથા ।
હે ભવ્યતમે ભારતભૂમે, ત્વં ભૂમિતલે વિભુભાસયુતા ॥ ૩॥

ભારતમાતઃ!  ઉપજીવ્યા મે, આરાધ્યા મે ત્વં પૂજ્યા મે ।
રક્ષ્યાસિ મયા વર્ધ્યાસિ મયા, કર્ત્તવ્યતયા દૃશ્યાસિ મયા ॥ ૪॥

દૃષ્ટિસ્ત્વમસિ દર્શનમથ ચ, દૃશ્યં સર્વં ખલુ મે માતઃ ।
નનુ દૃશ્યસેઽત્ર-સર્વત્ર મયા, સર્વત્ર મયા ત્વં હ્યનુભૂતા ॥ ૫॥

અહમસ્મિ તવાધીનો માતસ્ત્વં ચાસિ મયા પ્રમુદિતવદના ।
ત્વં ભોરમસિ મયિ તે સત્ત્વં, દેહી મમ દેહવતોઽસિત્વમ્ ॥ ૬॥

સુફલં સુભગં સુમધુરગીતં, વિધિના રચિતં કવિના મુદિતમ્ ॥

ધર્માશ્રયભૂતં કર્મપદં, ભારતવર્ષં ભારતભૂતમ્ ॥ ૭॥

સઙ્કલ્પદૃઢઃ◌ं નીત્વા હૃદયે, પશ્યામિ સદા ભારતદેશમ્ ।
આયામિ સદા પૃચ્છામિ સદા, ગચ્છામિ સદા ભારતદેશમ્ ॥ ૮॥

– ચન્દ્રગુપ્તભારતીયઃ

*bhAratAShTakam*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*